**22R/19R**

# टिळक महाराष्ट्र विद्यापीठ, पुणे

**संस्कृत विशारद – (नियमित)**

**परीक्षा : मे –२०२५**

**सत्र ५ वे/सत्र ६ वे**

**विषयः कादम्बरी (22R456/19R462)**

**दिनांक :२१/०५/२०२५** **गुण :६०** **वेळ : दु. २.०० ते ४.३०**

**सूचना :** सर्व प्रश्न अनिवार्य

**प्र. १ त्रयाणामनुवादं ससंदर्भं मातृभाषया कुरुत** (२४)

१) ततो नातिदूरवर्तिनीम् 'अन्तःपुराद्वैशम्पायनमादायागच्छ' इति समुपजाततद्वृत्तान्तप्रश्नकुतूहलो राजा प्रतीहारीमादिदेश । सा क्षितितलनिहितजानुकरतला 'यथाज्ञापयति देवः' इति शिरसि कृत्वाज्ञां यथादिष्टमकरोत् । अथ मुहूर्तादिव वैशम्पायनः प्रतीहार्या गृहीतपञ्जरः कनकवेत्रलतावलम्बिता किंचिदवनतपूर्वकायेन सितकञ्चुकावच्छन्नवपुषा जराधवलितमौलिना गद्गदस्वरेण मन्दमन्दसंचारिणा विहङ्गजातिप्रीत्या जरत्कलहंसेनेव कञ्चुकिनानुगम्यमानो राजान्तिकमाजगाम। क्षितितलनिहितकरतलस्तु कञ्चुकी राजानं व्यज्ञापयत् – देव, देव्यो विज्ञापयन्ति, देवादेशादेष वैशम्पायनः स्नातः कृताहाराश्च देवपादमूलं प्रतीहार्यानीतः।

२) प्रविश्य च सा नरपतिसहस्रमध्यवर्तिनमशनिभयपुञ्जितकुलशैलमध्यगतमिव कनकशिखरिणम् अनेकरत्नाभरणकिरणजालकान्तरितावयवमिन्द्रायुयुधसहस्रसंछादिताष्टदिग्भागमिव जलधरदिवसम् अवलम्बितस्थूल-मुक्ताकलापस्य, कनकशृङ्खलानियमितमणिदण्डिकाचतुष्टयस्य गगनसिन्धुफेनपटलपाण्डुरस्यदुकूलवितानस्या-धस्तादिन्दुकान्तपर्यङ्किकानिषण्णम्,आयतलोचनमपि सूक्ष्मदर्शनम् अकरमपि हस्तस्थितभुवनतलं राजानमद्राक्षीत्।

३) स तस्यामवजिताशेषभुवनमण्डलतया विगतराज्यचिन्ताभारनिर्वृतः द्वीपान्तरागतानेकभूमिपालमौलि-मालालालितचरणयुगलो वलयमिव लीलया भुजेन भारमुद्कहन्, अमरगुरुमपि प्रज्ञयोपहसद्भिरनेककुलक्रमागतैरसकृदालोचितनीतिशास्त्रनिर्मलमनोभिरलुब्धैः स्निग्धैः प्रबुद्धैश्चामात्यैः परिवृतः समानवयोविद्यालङ्कारैरनेकमूर्धाभिषिक्तपार्थिवकुलोद्गतैरखिलकलाकलापलोचनकठोरमतिभिरतिप्रगल्भैः राजपुत्रैः सह रममाणः प्रथमे वयसि अतिचिरमुवास।

४) प्रायेण हि पक्षिण: भयाहारमैथुननिद्रासंज्ञामात्रवेदिनो भवन्ति । इदं तु महच्चित्रम् इत्युक्तवति भूभुजि कुमारपालित: किंचित् स्मितवदनोऽवादीत् – 'किमत्र चित्रम् । एते हि शुकसारिकाप्रभृतयो विहङ्गविशेषा यथाश्रुतां वाचमुच्चारयन्तीत्यधिगतमेव देवेन । तत्राप्यन्यजन्मोपात्तसंस्कारानुबन्धेन वा पुरुषप्रयत्नेन वा संस्कारातिशय उपजायत इति नातिचित्रम्'। अन्यदेतेषामपि पुरा पुरुषाणामिवातिपरिस्फुटाभिधाना वागासीत्। अग्निशापात्त्वस्फुटालापता शुकानामुपजाता करिणां च जिव्हापरिवृत्तिः।

**प्र. २ ससंदर्भं स्पष्टीकुरुत (केवलं चत्वारः) ।** (२४)

१.विहङ्गवेषधारी कश्चिच्छन्नं निवससि।

२. सन्निहितविषधरेव भीषणरमणीयाकृतिः।

३. क्रूरसत्त्वापि मुनिजनसेविता।

४. कुपतिमपि कलत्रवल्लभम्।

५. मदनधूममलिनीकृतामिव रतिम्।

६. राजाज्ञेव राजभिः शिरोभिरुह्यमाना।

**प्र. ४ टिप्पणीद्वयं लिखत।** (१२)

१. वैशम्पायनस्य आर्या २. विन्ध्याटवीवर्णनम् ३. मातङ्गकन्या

----------